## आम्र

**आम्रत्वचा कषाया च मूलं सौगंधि ताद्यशम् ।**
**रुच्यं संग्राहि शिशिरं पुष्पं तु रुचिदीपनम् ।।**
**आम्रपुष्पमतीसारकफपित्तप्रमेहनुत् ।**
**असृग्दुष्टिहरं बल्यं रुचिकृद् ग्राहि वातलम् ।।** (Bpn)

Amra tvaca is kashaya in rasa, mula is saugandhi, rucya sangrahi, sisira in guna, puspa is ruci krd and dipana.

Amra puspa is balya, ruci karaka, grahi, increases vata, alleviates atisara, kapha pitta prameha, asrg drsti.

## बालाम्रगुणाः

**आम्रं बालं कषायाम्लं रुच्यं मारुतपित्तकृत् ।**
**तरुणन्तु तदत्यम्लं रूक्षं दोषत्रयास्त्रकृत् ।।**

Balamra is kashaya, amla, rucya, maruta pitta karaka.

Taruna phala is atyamla in rasa, ruksa in guna, dosha trayasra karaka.

## आम्रपेशिकागुणाः

**आम्रमामं त्वचाहिनमातपे अतिशोषितम् ।**
**अम्लं स्वादु कषायं स्यात् भेदनं कफवातजित् ।।**

Ama amra is bad for the skin, is atisosana, amla, svadu, kashaya in rasa, bhedana, alleviates kapha and vata.

**<u>पक्वाम्रगुणाः</u>**

**पक्वन्तु मधुरं वृष्यं स्निग्धं बलसुखप्रदम् ।**
**गुरु वातहरं हृद्यं वर्ण्यं शीतमपित्तलम् ।।**
**कषायानुरसं वह्निश्लेष्मशुकविवर्धनम् ।**
**तदेव वक्षसंपक्वं गुरु वातहरं परम् ।।**
**मधुराम्लरसं किंचिद्भवेत् पित्तप्रकोपनम्।।**
**आम्रं कृत्रिमपक्वन्तु तद्भवेत् पित्तनाशनम् ।।**
**रसस्याम्लस्य हीनन्तु माधुर्याच्च विशेषतः ।**
**उषितं तत्परं रुच्यं बल्यं वीर्यकरं लघु ।।**
**शीतलं शीघ्रपाकि स्यात् वातपित्तहरः सरम् ।**

Pakva amra is madhura in rasa, kashayanurasa, sita in veerya, snigdha, guru in guna, vrshya, hrdya, varnya, bala sukhi prada, vata hara, apittala, vahni-slesma-sukra vivardhana.

Sampakva is madhura amla in rasa, guru in guna, vatahara param, slightly pitta kopana.

Ama krtrima pakva is pitta nasana, hina in amla rasa and is madhura in rasa.

Usita is param, rucya, balya, viryakara, laghu sara in guna, sitala in veerya, sighrapaki, vatapitta hara.

**<u>रसगुणाः</u>**

**तद्रसो गालितो बल्यो गुरुः वातहरः सरः ।**
**अहृद्यस्तर्पणोऽतीव बृंहणः कफवर्द्धनः ।।**

Its rasa is madhura, guru, sara in guna, balya, vata hara, ahrdya, tarpana ativa, brmhana and kapha vardhana.

<u>आम्रखण्डगुणाः</u>

**आम्रखण्डं गुरु परं रोचनं चिरपाकि च ।**
**मधुरं बृंहणं बल्यं शीतलम् वातनाशनम् ।।**
**वृष्यं वर्णकरं स्वादु दुग्धाम्रं (?) गुरु शीतलम् ।**
**वातपित्तहरं रुच्यं बृंहणं बलवर्द्धनम ।।**
**मन्दानलत्वं विषमज्वरञ्च रक्तामयं बद्धगुदोदरञ्च ।**
**आम्रातियोगन्नयनामयं वा करोति तस्मादति तानि नाद्यात् ।।**

Amra kanda is madhura in rasa, guru param, rocana, cirapaki, brmhana, balya, sitala, vata nasana, vrshya, varna kara and svadu.

Dugdhamra is guru, sitala, alleviates vata and pitta, rucya, brmhana, balavardhana, mandanalatva, visamajvara hara, rakta maya baddhgudodara hara, causes nayanamaya if used excessively, and hence it has to be avoided in excess.

**एतदम्लाम्रविषयं मधुराम्लपरं न तु ।**
**मधुरस्य परं नेत्रहितत्वाद्या गुणाः यतः ।।**
**शुण्ठ्यम्भसोऽनुपानं स्यादाम्राणामतिभक्षणे ।**
**जीरकं वा प्रयोक्तव्यं सह सौवर्चलेन वा।।**

Similar is with Amla amra and Madhura amla. Madhura amra is Param and is Netra hita. Amra if taken in excess should be followed by Sunthaymbu as Anupana or water with Jiraka or with Sauvarcala lavana.

**आम्रावर्त्तस्तृषाच्छर्द्दिवातपित्तहरः सरः ।**
**रुच्यंः सूर्यांशुभिः पाकाल्लघुश्च स हि कीर्तितः ।।**

Amravarta (thickened juice) is sara in guna, rucya, trsha, suryasubhi, on paka laghu, alleviates chardi, vata and pitta.

**<u>आम्रबीजगुणाः</u>**

**आम्रबीजं कषायं स्याच्छर्द्यतीसारनाशनम् ।**
**ईषदम्लञ्च मधुरं तथा हृदयदाहनुत् ।।**

Amra bija is kashaya in rasa, slightly amla, madhura in rasa, alleviates chardi, atisara and hrdaya daha.

**<u>आम्रपल्लवगुणाः</u>**

**आम्रस्य पल्लवो रुच्यः कफपित्तविनाशनः ।। (Bpn)**

Amra pallava is rucya and kapha pitta nasana.

**<u>क्षुद्राम्रगुणाः</u>**

**कोशाम्रमम्लमनिलापहरं कफार्ति-**
**पित्तप्रदं गुरु विदाहविशोफकारि ।**
**पक्वं भवेन्मधुरमीषदपारमम्लं**
**पट्वादियुक्तरुचिदीपनपुष्टिबल्यम् ।।**

Kosamra is amla in rasa, guru in guna, anilahara, kapha arti pitta prada, vidaha visopha kari.

Pakva is madhura, slightly amla, patu in rasa, rucya, dipana, pusti da and balya.

**<u>राजाम्रगुणाः</u>**

**राजाम्राः कोमलाः सर्वे कट्वम्लाः पित्तदाहदाः ।**
**सुपक्वाः स्वादुमधुराः पुष्टिवीर्यबलप्रदाः ।। (Rjn)**

Rajamra is komala, sarve katvamla, pittadaha hara, supakva, svadu madhura, pusti virya balaprada.

**आम्रत्वचा कषाया च मूलं सौगन्धि ताद्यशम् ।**
**रुच्यं संग्राहि शिशिरं, पुष्पं रोचनदीपनम् ।। (Rjn)**

Amra tvaca is kashaya in rasa, mula is saugandhi, rucya, sangrahi, sisira, puspa is rocana dipana.

**रक्तपित्तकरं बालमापूर्णं पित्तवर्धनम् ।**
**पक्वमाम्रं जयेद्वायुं मांसशुक्रबलप्रदम् ।। (चरक सु २७)**

Bala is Rakta pittakara, Pittavardhana. Pakva is Vata hara, Mamsa sukra balaprada.

**पित्तानिलकरं बालं पित्तलं बद्धकेसरम् ।**
**हृद्यं वर्णकरं रुच्यं रक्तमांसबलप्रदम् ।।**
**कषायानुरसं स्वादु वातघ्नं बृंहणं गुरु ।**
**पित्ताविरोधि संपक्वमाम्रं शुक्रविवर्धनम् ।**
**बृंहणं मधुरं बल्यं गुरु विष्टभ्य जीर्यति ।। (सुश्रुत सु ४६-१२७)**

Bala is Pittanilakaraka, Pittala, baddha kesara, Hrdya, Varnakaraka, Rucya, Rakta mamsa bala prada, Kashaya anurasa, Svadu, vatghna, Brmhana, guru.

Sampakva is Pittavirodhi, Sukra vivardhana, Brmhana, Madhura in rasa,  Balya, Guru, Vistambhi.

**<u>आम्रास्थितैलगुणाः</u>**

**आम्रतैलं तु तुवरं स्वादु रूक्षं च तिक्तकम् ।**
**सुगन्धि मुखरोगस्य नाशनं कफवातनुत् ।।**

Amra asti is Tuvara, Svadu, Ruksa, Tiktaka, Sugandhi, Mukha roga nasana, Kapha vata hara.

**<u>आम्रान्तस्त्वग्गुणाः</u>**

**आम्रान्तस्त्वग् ग्राहिणी तु तुवरा दाहकारिणी ।**
**पित्तमेहकफानाहनाशिनी योनिशुद्धिकृत् ।।**

Amra Tvaca is Grahini, Tuvara, Daha karini, Pitta meha kapha anaha nasini, Yoni suddhakaraka.

**आम्रमूलगुणाः आम्रमूलन्तु तुवरं ग्राहि शीतं रुचिप्रदम् ।**
**सुगंधि कफवातानां नाशनं परिकीर्तितम् ।। (Nir)**

Amra mula is Tuvara in rasa, Grahi, Sita in potency, Ruci prada, Sugandhi, Kapha vata nasana.